# २२. श्री राघवेंद्र मंगलाष्टकम्

श्रीमद् रामपदारविंद-मदुपः श्रीमध्व-वंशाधिपः ।
सच्छिष्योडु-गणोडुपः श्रितजगद् गीर्वाण-सत्पादपः ।
अत्यर्थं मनसा कृताऽच्युतजपः पापांधकारातपः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।१।

कर्मंदींद्र-सुदींद्र-सद्गुरु-करांभोजोद्भवः संततं ।
प्राज्यध्यान-वशीकृताखिल-जगद्-वास्तव्य-लक्ष्मीधवः ।
सच्छस्त्राति-विधूषकाखिल-मृषा-वादीभ-कंठीरवः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।२।

सालंकारक काव्यनाटक-कला-काणाद-पातंजल ।
त्रयर्थस्मृति-जैमिनीय-कविता-संगीत-पारंगतः ।
विप्रक्षत्र-विडंघ्रिजात-मुखरानेक-प्रजासेवितः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।३।

रंगोत्तुंग-तरंग-मंगळकर-श्रीतुंगभद्रातट ।
प्रत्यस्थ-द्विज-पुंगवालय-लसन्-मंत्रालयाख्ये पुरे ।
नव्येंद्रोपल-नील-भव्यकर-सद्-वृंदावनांतर्गतः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलंं ।४।

विद्वद्-राजशिरः-किरीट-खचितानर्घोरु-रत्नप्रभा ।
रागाघौघह-पादुकाद्वयचरः पद्माक्ष-मालाधरः ।
भास्वद्-दंड-कमंडलूज्वल-करः रक्तांबराडंबरः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।५।

यद्-वृंदावन-सप्रक्षिण-नमस्काराभिषेक-स्तुति ।
ध्यानाराधन-मृद्-विलेपन-मुखानेकोपचारान् सदा ।
कारंकारमभिप्रयांति चतुरो लोकाः पुमर्थान् सदा ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।६।

वेदव्यास-मुनीश-मध्वयतिराट् टीकार्यवाक्यामृतं ।
ज्ञात्वाऽत्मैक्य-मतं हलाहलसमं त्वक्त्वा समाख्याप्तये।
संख्यावत् सुखदां दशोपनिषदां व्याख्यां समाख्यान् मुदा ।

श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।७।

श्रीमद्-वैष्णव-लोकपालक-गुरुः श्रीमत्-परिव्राट्-भरुः ।
शास्त्रे देवगुरुः श्रितामरतरुः प्रत्यूह-गोत्रस्वरुः ।
चेतोतीत-शिरुः तथाजितवरुः  सत् सौख्यसंपत्-कुरुः ।
श्रीमत् सद्गुरु राघवेंद्र यतिराट् कुर्याद् ध्रुवं मंगलं ।८।

यः संध्यास्वनिशं गुरोर्व्रतिपतेः सन्मंगळस्याष्टकं ।
सद्यःपापहरं स्वसेविविदुषां भक्तैव बाभाषितं ।
भक्त्यावक्ति सुसंपदं शुभपदं दीर्घायुरारोग्यकं ।
कीर्तिं पुत्रकळत्रबांधवसुहृन्मूर्तिः प्रयाति ध्रुवं ॥

॥इति श्रीमद्राघवेंद्रमंगलाष्टकं संपूर्ण ॥